**दिनाङ्क :-19.03.2024**
**प्रात: - 06:55**

**<u>निर्वाचनायोग:</u>**

लोकसभानिर्वाचनात् पूर्वं निर्वाचनायोगेन ह्य: अधिकारिणां बृहत्स्तरे स्थानान्तरणाय आदेशः प्रदत्तः। आयोगेन पश्चिमबङ्गस्य आरक्षि महानिदेशकं समेत्य षट् राज्याणां गृहसचिवा: अपि निष्कासिता:। सूत्रानुसारि गुजरातस्य, उत्तरप्रदेशस्य, बिहारस्य, झारखण्डस्य, हिमाचल प्रदेशस्य, उत्तराखंडस्य च गृहसचिवाः स्थानान्तरिताः। मिजोरम-हिमाचलप्रदेशयोः सामान्यप्रशासनिकविभागस्य सचिवौ अपि स्थानान्तरितौ। तदतिरिच्य, बृहन्मुम्बईनगरपालिकायुक्तस्य इकबालसिंहचहलस्य अपि च अतिरिक्तायुक्तानां उपायुक्तानां च स्थानान्तरणस्य आदेश: निर्वाचनायोगेन प्रदत्त:।

**<u>प्रधानमन्त्री/जनसभा</u>**

वरिष्ठ-भाजपा-नेता प्रधानमन्त्री च नरेन्द्र-मोदी उक्तवान् यत् दक्षिणीय-राज्येषु राष्ट्रिय-लोकतान्त्रिक-संयुते: पक्षे उत्साहोऽस्ति। तेलंगानाया: जगतियाले ह्य: एकां नैर्वाचनिक-जनसभां सम्बोधयन् श्रीमोदी उक्तवान् यत् भाजपादलं तेलंगाना-क्षेत्रीय-जनानाम् आकांक्षा: पूरयितुं वचनबद्धमस्ति। तेन उक्तं यत् जगतियालस्य जनसभायां एकत्रित: जनसम्मर्द: स्पष्टतया संकेतं ददाति यत् वायु: कस्याम् दिशि प्रवहति। एतदनन्तरं प्रधानमन्त्री कर्णाटकस्य शिवमोग्गा-जनपदे जनसभां संबोधितवान्। कांग्रेस-दलं आक्षिपन् स: अवदत् कांग्रेस-दलं भ्रष्टाचरणात्मक-राजनीतिं करोति, परञ्च भाजपेति-दलस्य अर्थ: अस्ति विकास: विकसितं भारतं च।

**<u>स्टार्टअप-महाकुम्भ:</u>**

स्टार्टअप महाकुम्भ अद्य नवदिल्ल्या: भारतमण्डपम् इत्यत्र समारब्धम्। कार्यक्रमोऽयं मार्च-मासस्य विंशति-दिनांकं यावत् प्रचलिष्यति। अस्मिन् आयोजने विभिन्न-स्टार्टअप-इत्येतेषां नवोद्योगानां विभिन्न-मण्डपा: भविष्यन्ति। येषु ए.आई., बीटूबी, एग्रीटेक, डीपटेक, क्लाईमेट टेक्, गेमिंग, ई-स्पोर्टस, फिटनेस सदृशा: नैके मण्डपा: सम्मेलिता: सन्ति। अस्य महाकुम्भस्य उद्देश्यं धनपतिनां निवेशकानां च भारतीय-व्यापारेण सह संयोजनम् अस्ति। उद्योग-सम्वर्धनान्तरिक-व्यापार-विभागस्य सचिवेन राजेश-कुमार-सिंहेन उक्तं यत् भारतं तृतीय: सर्वाधिकबृहत्तम: स्टार्टअप-तन्त्रस्य देश: अस्ति। अपि च देशे सम्प्रति स्टार्टअप इति एकलक्षाधिका: सन्ति। यत् हि षोडशोत्तर-द्विसहस्रतमे वर्षे स्टार्टअप-इण्डिया-उपक्रमस्य आरम्भे केवलं त्रिशतं यावदेव आसीत्। स्टर्टाअप इत्यस्मिन् डीपटेक् अपि च अनुसंधान-विकासयो: महत्वे प्रवदता श्री सिंहेनोक्तं यत् आगामि मासेषु एकं भिन्नं समर्पितं च डीपटेक-स्टार्टअप नीतये अन्तिमं रूपं प्रदीयते। तेनोक्तं यत् पारिस्थितिकीय-तन्त्रेण विगतेषु अष्टवर्षेषु दशलक्षाधिका: वृत्यवसरा: एककोटितोप्यधिका: अप्रत्यक्ष-वृत्यवसरा: सृजिता:।

**भारतीयर्तु-विज्ञान-विभागः**

भारतीयर्तु-विज्ञान-विभागेन आगामिदिनत्रयार्थं बंगालस्य गांगेय-क्षेत्रे ओडिशायां च मध्यमवृष्टि-झंझावातयोः संभावना कृतास्ति। महाराष्ट्र-मध्यप्रदेश-छत्तीसगढ-राज्यानां कतिपय-भागेभ्यः नारङ्गवार्णिकी सञ्चेतना अपि प्रसारिता। विभागेन उक्तं यत् मध्यप्रदेशस्य, छत्तीसगढस्य, विदर्भस्य, झारखण्डस्य च केषुचित् भागेषु वज्रपात-विद्युत्प्रकोप-झंझावातानां संभावना अस्ति।

**।। इति वार्ताः ।।**